श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

सेवा श्री श्रीनिवासराघवार्य महादेशिक विरचिता

# ॥ श्रीलक्ष्मीपञ्चाशत् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीलक्ष्मीपञ्चाशत् ॥

हयग्रीवकृपापात्रम् आत्रेयकुलभूषणम्।
सेवाख्यस्वामिनं सेवे बुधन्त्वपरदेशिकम्॥

मातारं प्रणमामि पूर्वमपुनर्भावाय योगाय मे
त्रातारं कलिकल्मषाद्द्रुततरं प्रीत्यै तवाम्बाधुना।
मातासि त्वमनन्तखेदकदनी जानासि मां सर्वतः
नामान्यद्भुतशक्तिमन्ति कलये पद्मावति प्रीतये॥ 1 ॥

त्वन्नामानि बृहन्ति मूलधनमित्याहुः श्रुतीनां बुधाः
श्रुत्वा तानि मदीयपापकदने युक्तान्यभीक्ष्णं मुदा।
वक्तुर्मे मुदिता भव प्रियतरा मुग्धाक्षराकर्णनात्
आनन्देन निजाङ्कगं करयुगेनाश्लिष्य मां वर्धय॥ 2 ॥

नामानि प्रथयन्ति ते भगवति प्रेमप्रफुल्लानने
येषामन्वहमीरणेन मनुजो धन्यो भवेन्निश्चितम्।
न स्यात्तस्य भवो न चैव नरको नावर्तकल्पे वसेत्
तस्मान्नामसुधां पिबामि दिविषद्भोग्यां श्रुतिभ्यां रमे॥ 3 ॥

आनन्त्येन युतामनन्तमहिषीमानन्त्यमाप्तुं श्रये
जाग्रत्येव शुभानि संसृतिपदेऽनन्तानि नामानि ते।
मातुर्नाम वदन्न याति निधनं धूर्तोऽपि वा पण्डितो
विन्दत्येव विभूतिमुज्ज्वलतरां विश्वम्भरप्रेयसि॥ 4 ॥

आशापाशतरङ्गितं मम मनो दुष्प्रापचिन्ताहतं
वीक्षातस्तव वञ्चितं यदि रमे का मे नु सत्ता भवेत्।
मातुः पालनतो लभेत मनुजो भूतिं तथर्द्धिं परां
अम्बाहं तव सन्निधावनुचरः कुर्यां सपर्यां सदा॥ 5॥

शक्तिर्मे न च विद्यते भगवति श्रद्धाऽथवा भार्गवि
मेधा मान्यतमा न मानमपि वा वाणीविहारो नहि।
अस्म्येवाहमशक्त एव सततं शाक्तोऽपि मां रक्षितुं
श्रद्धे मामव देहि धीविलसितं पुष्टां तथा भारतीम्॥ 6॥

वक्षस्स्थानमुपेयुषी भगवतो वत्सेन साकं स्थिता
प्रेमोत्फुल्लसुलोचना प्रियतमं पुष्णासि चाश्लेषतः।
तद्वक्षस्थलकौस्तुभेन मुदिता देव्यम्ब मामर्भकं
तुङ्गोत्सङ्गगतं विधाय परमं तोषं न किं विन्दसे॥ 7॥

पारम्यं परिशीलयन्ति कमले शीलादिजुष्टास्तथा
पारम्पर्यरहस्यसारधिषणाः प्राज्ञो विपश्चित्तमाः।
नाथस्ते परमः परात्पर इति ख्यातः प्रमाणैः परं
तेनापि ध्रियसे शिरोभिरथवा वक्षस्थलेनाद्भुतम्॥ 8॥

दृष्ट्या ते परया चराचरमिदं सन्धुक्षितं सर्वतः
सृष्टानां परमेण ते प्रियतमेनात्यद्भुतं जीवनम्।
इष्टानां परिपूर्णतः प्रणमतां सिद्धिस्तथा नन्दनं
श्रेष्ठानामनुवर्तनञ्च घटते पद्माक्षवक्षस्थिते॥ 9॥

हस्ताभ्यां कमले बिभर्षि कमले फुल्लारविन्देक्षणे
दृष्ट्यैवाम्बुजरम्यकोमलतमस्वान्ते परप्रेयसि।
नूनं दर्शयसीह साधु जगतामज्ञाततां निग्रहे
तत्ते दर्शनतो लभेय महतीं निश्चिन्ततां निश्चितम्॥ 10॥

देवास्सन्ति सहस्रशो दिवि तथा भूमौ च कौतूहलात्
  तान् लोकास्समुपासते विधिवशादम्बास्मि ते सेवकः।
आकाशे विलसन्तु भानि नितरां तुल्यानि किं वेन्दुना
  विन्दन्ति स्पृहणीयतां च कमले नैवेति जानाम्यहम्॥ **11**॥

मातस्त्वं जगतां ममासि कमले प्रेमप्रहर्षोदिता
  सेवायां निरतोऽस्मि दैववशतस्त्वद्वीक्षणादन्वहम्।
प्रीतायां त्वयि भावुकः प्रियतमस्ते मोदते मामकैः
  कृत्याकृत्यशतैः कदापि लभते क्रोधस्य नाधीनताम्॥ **12**॥

किं ग्रन्थैः पठितैस्तथैव लिखितैः किं वा तपस्यादिभिः
  किं वाडम्बरचेष्टितैस्सुमधुरैरालापनैर्वानिशम्।
किं सङ्केतकथाशतैरघटितस्यापादकैर्वा रमे
  त्वद्वीक्षा प्रसृता न चैव भुवने चेदम्ब वीक्षस्व माम्॥ **13**॥

श्रीमद्वस्तु समस्तमेव धरणावूर्जस्वि सञ्जायते
  नाथेनापि समर्थितं बहुमतिप्रीतिप्रहर्षास्पदम्।
मन्ये सोऽपि तवैव सङ्गवशतः श्रीमानभूदन्यथा
  तस्यापि श्रुतिसम्मता बहुमतिर्जायेत कस्माद्रमे॥ **14**॥

वक्षस्थानमुपेत्य वारिधिसुते सर्वोत्तमं व्यातनोः
  नाथं तस्य तनोषि सर्वसुभगां मुद्रां हि तीरं गता।
संसारार्णवमग्नचेतनगणं त्वं तारयन्ती सदा
  दिव्यानन्दपयोधिमग्नमनिशं वीक्षस्व मोदस्व माम्॥ **15**॥

किं नो विष्णुपदे लभेत विहगो भूतिं सुखं सर्वदा
  सौख्यं किं न हि विन्दते मृगवरः स्वच्छन्दसञ्चारतः।
किं वा तैस्सुकृतं कृतं नु कमले जातोऽस्म्यहं मानवः
  चिन्तां कामपि सृष्टवान् मम कृते धाताव मां साम्प्रतम्॥ **16**॥

वैशिष्ट्यं चमके विशिष्टविभवे शिष्टेष्टदेऽष्टात्मना
    पुष्टिं सृष्टसमस्तजीवनिवहे दृष्ट्याभिवर्षस्यहो।
इष्टं यागवरैर्हुतं च बहुधा दत्तं च युक्तं सतां
    तत्सर्वं तव वीक्षणेन कमले लक्षात्मतां विन्दते॥ **17** ॥

वेदान्तार्यमुखा ह्यपश्चिमधियो नूनं विपश्चित्तमाः
    देवेशं प्रतियन्ति सागरगतं दिव्यं तरङ्गं सदा।
तत्स्थां च प्रतियन्ति देवि भवतीं माधुर्यरूपां मुदा
    किं तत्त्वं तदिहेति तीरनिलया किं वीक्षसे साम्प्रतम्॥ **18** ॥

किं ब्रूयां तव वैभवं त्रिचतुरैर्वर्णैस्सदाम्रेडितैः
    दूरादप्यवशं वशे विदधती तीर्थीकरोष्यञ्जसा।
नूनं मङ्गलसन्ततिं मधुमयीं पुष्णास्यपाङ्गैः रमे
    तुङ्गं सङ्गमभीष्टमष्टपदवीस्थित्या विधत्सेऽधुना॥ **19** ॥

स्थानं तेऽष्टपदानि देवि सुभगं रूपं तथाष्टापदं
    स्पष्टं कष्टनिवारणाय जगतां कृत्यानि चेष्टानि ते।
दृष्टिः पुष्टिकरी स्वसृष्टजनताभीष्टप्रदात्री सदा
    भूतिश्चाष्टदिशासु जृम्भत इति प्रेष्ठां श्रये त्वां श्रियम्॥ **20** ॥

मग्नः संसृतिसागरे विषभरे कामादिनक्रोद्धते
    मीनाधीतचलस्वभावकलिले चाशोर्मिजालोल्बणे।
लब्ध्वोन्मज्जनमज्जनानि कथमप्यप्राप्य तीरं स्थितो
    मां दृष्ट्वा हसितं विहाय गमय प्रीत्यानुकूला तटम्॥ **21** ॥

उत्थानं तव वेद्मि दुग्धजलधेरुत्थापयेमं शिशुं
    वक्षस्था हरिचन्दनस्य कमले हृद्यं विदध्या मुदा।
त्वद्दृष्ट्या परिबृंहितं त्रिभुवनं वीक्षस्व मामाशया
    श्रीवत्सेन विराजसे तव करे किं नास्मि वत्सो रमे॥ **22** ॥

श्रीवत्सः प्रथते परत्वकरणेष्वत्यद्भुतः शोभनः
श्रीमान् वारिधिसम्भवो मणिमयो भूषायितो वक्षसि।
माला मल्लिमतल्लिकातुलसिकागुम्भेन सा राजते
श्रीमत्त्वं परमे त्वयैव घटते तद्वक्षसश्चेन्दिरे ॥ **23** ॥

त्वामाहुः परदेवतां परगतां चामीकराभेऽब्जजे
रूपं ते परभास्वरं भृगुसुते नाथो घनश्यामलः।
मूर्धस्वेव विभासि वेदवचसां तुङ्गेऽन्तरङ्गाशये
चान्तर्ध्वान्तमपाकुरु प्रणयतो नाथं वशे कृण्वती ॥ **24** ॥

गर्भस्थोऽपि निरीक्षितः कमलया जीवो भवेन्निश्चितं
गर्भश्रीरिति सर्वमेति धरणौ पूज्येत रज्येत वा।
वीक्षातः श्रियमादधासि कमले दीक्षा महीयस्यहो
तां त्वां साधु भजेऽद्य देवि करुणापाङ्गैरथेक्षस्व माम् ॥ **25** ॥

आत्मानं बहुधा विधाय बहुधा लोकं बिभर्षि स्वयं
सम्प्राप्याष्टतनूस्तनोषि जगतामिष्टं कटाक्षै रमे।
अष्टैश्वर्यमवाप्य कष्टनिचयाद्भ्रष्टो विशिष्टो भवन्
दिव्यानन्दमयो विभाति महतामिष्टो जगत्यां जनः ॥ **26** ॥

शास्ता शासननिर्भरेण मनसा दण्डं धरत्यन्वहं
वैषम्येण विनाकृतो वितनुते स्वीये तथान्येषु च।
दण्ड्यो यद्यहमस्मि शाश्वततया का वा गतिर्मातरं
त्वामद्यैव समाश्रयेऽद्य भुवने वात्सल्यतः पाहि माम् ॥ **27** ॥

पाण्डित्येन समर्चयन्ति बहवस्तन्नास्ति मे पुष्कलं
वाचा धर्ममवाप्नुहीति गदितं वाचास्ति नो मद्वशे।
निष्ठा नापि निरन्तरा भगवति श्रैष्ठ्यं कथं जायतां
श्रेयो देवि समश्नुवीय विधिना येनाद्य मातर्वद ॥ **28** ॥

चिन्ता मां भजते निरन्तरमहो जाने वरं कारणं
कर्म स्यात्समुपार्जितं बहुजनिप्राप्तं तथा सञ्चितम्।
देवि त्वच्चरणारविन्दयुगलं ध्यायामि नान्या गतिः
चिन्तामाशु विशोषणीमपनय प्रीत्या समीच्या दृशा॥ 29 ॥

पूर्णो वारिनिधिस्त्वयैव कमले पूर्णश्च नारायणः
पूर्णा त्वं जनिकर्मदृष्टिविभवैः सम्पत्समृद्ध्यादिना।
पूर्णं तत्परमं पदं दिविषदां साम्राज्यमप्यद्भुतं
पूर्णाः स्याम वयं च पूर्णविभवे मातस्तवेक्षाबलात्॥ 30 ॥

स्त्रीत्वैकान्तगुणान् बिभर्षि कमले कान्तादपि श्रेयसी
कान्तो यद्यपि दिव्यभव्यगुणवान् पुंस्त्वं व्यनक्ति स्वयम्।
तस्माद्दण्डधरो बिभर्ति बहुधा हेतीरजस्रं रमे
जाने त्वं धरसे सदैव कमले व्यक्तं हि ते मार्दवम्॥ 31 ॥

विद्यावित्तवसुप्रदानमहिता सद्धारणाभ्यां युता
सत्सन्तानकरी सदा विजयदा वीर्योत्तरा विश्रुता।
आदिश्रीरनुरूपरूपविभवा यानादिजुष्टा रमा
सर्वाकल्पविभूषिता विजयते मां पातु पद्मावती॥ 32 ॥

मत्तेभाः स्नपयन्ति हेमकलशैर्दुग्धाब्धिजे भक्तितः
मालिन्यं जगतां त्वमेव सहसा दूरीकरोषि ध्रुवम्।
इन्द्रोऽप्युत्तमतामवाप सुभगालोकेन ते शाश्वतीं
मालिन्येन विमोचितो विजयते का वा महत्ता रमे॥ 33 ॥

त्वं नाथेन युता समस्तजगतां सर्वं विधत्से रमे
के के नाम न सन्ति भूतिमहितास्त्वत्सेवनादेव ते।
यद्यन्नाम घटेत नैव मनुजेष्वंहः फलं पुष्कलं
तत्सर्वं घटयस्यभीष्टमधुना पूर्णं मदीयं व्यधाः॥ 34 ॥

जानाम्येव मदीयपापनिचयं सम्पादितं सर्वशो
वर्धिष्णुं स्वयमेव भूरिविभवं सन्मार्गसंशोषकम्।
एतावद्वृजिनालयोऽपि कमले संसारसम्पीडितः
त्वत्सेवास्मृतिनामकीर्तनपरो हन्त त्वमेवाव माम्॥ 35॥

शान्तिं देहि सदर्थदाननिरते नार्थे स्पृहा तादृशी
ख्यातौ नैव च पूजनादिषु रमे नास्थापि कोलाहले।
श्रीतत्त्वं भुवनेषु सर्वविदितं कर्तुं व्यवस्याम्यहो
योगक्षेमकरी विधत्स्व सफलामाशामिमां भूतये॥ 36॥

त्वन्नामस्मरणं सदैव भवताद्भद्रं लभेय ध्रुवं
त्वद्दत्तं मम वर्ततां शुभमयं वित्तं सदामोदनम्।
गेहारामकलत्रबन्धुजनतापुत्रादिकं त्वद्दृशा
त्वत्सेवौपयिकं सदास्तु कमले नान्यं वृणे वैभवम्॥ 37॥

मानातीतमतीतवैभवजुषामेतत्प्रतीतं रमे
तत्त्वं ते वचसा तथैव मनसा नो योगिना मीयते।
कस्मान्मादृशपामरश्चपलतः स्तोतुं प्रवृत्तो मुदा
तत्सर्वं कृपया क्षमस्व कमले बालस्य मे चेष्टितम्॥ 38॥

त्वामाप्तुं कवयन्ति केचन रमे द्युम्नादिरूपां सदा
यं वा कञ्चन चित्तहारिवचसा कामं स्तुवन्त्वेव ते।
त्वां सेवे कविवल्लभां कविसुतां गाथाशतग्राथिनीं
भूयात्ते मयि सर्वदैव रसिके तुष्टिस्ततः किं मम॥ 39॥

प्राज्ञं पश्यसि भूरि यच्छसि मुहुः प्रीता च तस्मै तथा
वित्तेनार्चयतां ददासि बहुलं वित्तादिकं प्रीतितः।
पारम्पर्यविधिं विधाय पुरतः पुष्णासि शं तेऽर्चतां
प्रज्ञावित्तपरम्परादिरहितं किं मां व्युदस्ये रमे॥ 40॥

आशापूरणमब्धिपूरणमथाकाशस्य सम्पूरणं
सर्वं पूरयसीति साधुविदितं पूर्णा यतो राजसे।
आशातो जलधेस्तथैव नभसोऽप्याशा महत्येव मे
जानास्येव कुतो न पूरयसि तामुत्कण्ठितस्योद्यता ॥ **41** ॥

नैश्चिन्त्यं वपुषा न चैव तपसा नो विद्यया वा क्वचित्
नैव ग्रन्थकथाशतादिरचनैर्नापि प्रशस्त्यादिना।
लभ्येतेति सुनिश्चितेन मनसा भूयोऽनुभूत्यादिना
निश्चित्याम्ब समाश्रये पदयुगं ते देहि तन्मेऽधुना ॥ **42** ॥

कर्माणि श्लथयन्ति भूरिजननप्राप्तानि सङ्गीभव -
त्यद्धा सत्पथवर्तनं स्थिरतरं भावं सदा रुन्धते।
विज्ञानं विपरीतलौकिकगतिर्वाञ्छा दुरर्थेषु च
श्रेयो भूरि कथं श्रयेय कमलावीक्षाविशेषैर्विना ॥ **43** ॥

विश्वासेन हि लभ्यते भगवति प्रेष्ठं प्रकृष्टं क्षितौ
विश्वासं परमं वदन्ति विबुधा हेतुं विमुक्तेरपि।
विश्वासेन विनोदयामि दिवसांस्त्वय्यम्ब निश्चप्रचं
विश्वासो नहि किं तवाद्य तनये मां रक्ष पद्मेक्षणे ॥ **44** ॥

सत्सङ्गं परमं वदन्ति भुवने निःश्रेयसप्राप्तये
तं चाप्तुं प्रयते बहोश्च समयादद्यापि नैवाप्नवम्।
किं सङ्गेन समीहितं मम रमे बालस्य मूढस्य वा
उत्सङ्गे तव वर्तनं हि महितं मातर्मुदा लोकय ॥ **45** ॥

अध्यारोहणसम्भृते तु मनुजे कोऽसीति वाचं वदन्
ब्रह्मास्मीति वचो निशम्य नितरामाक्षिप्तचित्तः क्षणात्।
उत्सङ्गे रममाणमेव तनयं दृष्ट्वा मुदं विन्दती
कोऽसीत्यम्ब कदापि नैव कथयेर्मामर्भकं किं वृणे ॥ **46** ॥

लक्ष्मीपूजनतो भजन्ति मनुजास्सम्पत्समृद्ध्यादिकं
प्राप्तुं शिष्यगणं जुहोति कमले त्वामावहन्त्या गुरुः।
मोक्षार्थी प्रथमं प्रपद्य भवतीं पश्चात्प्रभुं सेवते
जानन्नेव महत्त्वमम्ब सततं सेवे त्वया लोकितः॥ **47** ॥

ईक्षा ते प्रसृता पुनाति भुवनं पुष्णाति सर्वात्मना
योगं च प्रददाति सौख्यपदवीं प्रापय्य जेजीयते।
तद्वीक्षाविषयं विधत्स्व कमले मामर्भकं वत्सला
नोचेन्नाशमवाप्नवानि किमु ते दोषाय तत्कल्पते॥ **48** ॥

किं पृच्छामि किमर्थयेऽद्य कमले किं किं करोम्येव वा
किं वावश्यकमात्मदेहधरणे जानामि नैवाण्वपि।
ज्ञानेनाद्य नियोजयार्भकमिमं सत्सङ्गसम्पादिका
किं माता न यतेत सूनुविभवस्यार्थे ततो निर्वृतः॥ **49** ॥

स्मारं स्मारमहं दिनानि विभवं नेतुं व्यवस्यामि ते
जापं जापमहं त्वदीयशुभदान्यन्यानि नामान्यपि।
कारं कारमतीव शोभनकृतीरम्ब प्रमोदावहाः
नामं नाममहं नयामि दिवसान्मात्रा त्वया सम्भृतः॥ **50** ॥

पद्मे पद्मसुकोमलेन मनसा पद्मेक्षणेनाद्य मां
सद्म प्रापय शोभनं श्रुतिदृशोर्भूषायितं पुष्कलम्।
विद्यासन्ततिधान्यधैर्यविजयश्रीवित्तभाग्यादिभिः
नित्यं सन्निधिमारचय्य गजलक्ष्म्यम्बैहि शं मे भवेत्॥ **51** ॥

इत्थं श्रीनिधिराघवोऽत्रिकुलजः श्रीतत्त्वसञ्चिन्तकः
दिव्यश्रीमदनर्घदेविकरुणापाङ्गेन सन्धुक्षितः।

भूतिं मङ्गलमङ्गलस्य दयितुर्भक्त्या विवृण्वन् परां
पद्मामद्भुतनायिकां सुवचसाऽस्तौन्मङ्गलं पद्यताम् ॥ **52** ॥

॥ इति श्रीलक्ष्मीपञ्चाशत् समाप्ता ॥